# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा - शास्त्री-३, सेमेस्टर-५ | प्रश्नपत्रम् - ८ | गुणाः - ७० |
| विषयः - पुराणेतिहासः | कोड - CE-3.5.10 | समयः - ११-०२ |
| दिनाङ्कः - २.१२.२०१६ | ग्रन्थः - महाभारते भीष्मपर्वणि श्रीमद्भगवद्गीतापर्व - १३तः४२ अध्यायाः | |

---

**प्रथमान्वितिः ( युनिट - १ )**

**प्रश्नः १ पद्यद्वयस्य ससन्दर्भं सप्रसङ्गं विवेचनं कुरुत ।** ०८

*(१) जयोऽस्तु पाण्डुपुत्राणामित्यूचतुररिन्दमौ ।*
*युयुधते तवार्थाय यथा स समयः कृतः ॥*

*(२) हयानां ह्येषमाणानां योधानां चैव गर्जताम् ।*
*क्षणेनैव नमो भूमिः शब्देनापूरितं तदा ॥*

*(३) शुचिर्भूत्वा महाबाहो सङ्ग्रामाभिमुखे स्थितः ।*
*पराजयाय शत्रूणां दुर्गास्तोत्रमुदीरय ॥*

**प्रश्नः २** *(१) व्यूहपूर्वकं युद्धवर्णनं यथाग्रन्थं लिखत ।* १२

*अथवा*

*(२) अर्जुनकृता दुर्गास्तुतिः वर्ण्यताम् ।*

**प्रश्नः ३ पञ्चानां लघूत्तराणि यच्छत ।** ०५

*(१) भीष्मस्य मातुः नाम किम् ?*
*(२) अङ्गराजः कः आसीत् ?*
*(३) 'भीष्मः' इत्यस्य कोऽर्थः ?*
*(४) पाण्डवेषु कौ यमौ आस्ताम् ?*
*(५) अर्जुनशब्दस्य कः अर्थः ?*
*(६) ''जयोऽस्तु पाण्डुपुत्राणाम्'' कौ ऊचतुः ?*
*(७) जयद्रथः कः आसीत् ?*

**द्वितीयान्वितिः ( युनिट - २ )**

**प्रश्नः ४ कस्यचिदेकस्य ससन्दर्भं विवेचनं कुरुत ।** ०४

*(१) धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।*
*मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥*

*(२) संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।*
*यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ॥*

**प्रश्न: ५** *(१) स्थितप्रज्ञस्य लक्षणानि यथाग्रन्थं लिखत।* **१२**

*अथवा*

*(२) कर्मयोगं विलिख्य ध्यानयोगं लिखत।*

**प्रश्न: ६** **लघूत्तराणि लिखत। ( चतुर्णाम् )** **०४**

*(१) प्रथमाध्याये कस्य विषाद: वर्णित: ?*

*(२) अर्जुन: कस्मात् ''पार्थ:'' प्रोक्त: ?*

*(३) भगवद्गीतायां योगस्य का व्याख्या ?*

*(४) ''श्रेय:'' नाम किम् ?*

*(५) कस्मादन्नसम्भव: प्रोक्त: ?*

*(६) ''मामेकं शरणं व्रज'' क: कस्मै कथयति ?*

## तृतीयान्विति: ( युनिट - ३ )

**प्रश्न: ७** **पद्यद्वयस्य ससन्दर्भं सप्रसङ्गं विवेचनं विधीयताम्।** **०८**

*(१)* *श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद् ध्यानं विशिष्यते।*
*ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥*

*(२)* *रजस्तमश्चाभिभूय सत्त्वं भवति भारत।*
*रज: सत्त्वं तमश्चैव तम: सत्त्वं रजस्तथा ॥*

*(३)* *न तद्भासयते सूर्यो न शशङ्को न पावक:।*
*यद् गत्वा न निवर्तन्ते तद्धाम परमं मम ॥*

**प्रश्न: ८** *(१) संसारवृक्षवर्णनं कृत्वा क्षराक्षरविवेचनं विधीयताम्।* **१२**

*अथवा*

*(२) विभूतियोगवर्णनं यथाग्रन्थं प्रतिपाद्य विश्वरूपदर्शनं विवेचयत्।*

**प्रश्न: ९** **पञ्चानां लघूत्तराणि लिखत।** **०५**

*(१) भगवान् कस्मै दिव्यं चक्षु: यच्छति ?*

*(२) अर्जुनस्य धनुष: किं नाम आसीत् ?*

*(३) 'अर्जुन:' इत्यस्य क: अर्थ: ?*

*(४) कति गुणा: प्रोक्ता: के च ते ?*

*(५) ऊर्ध्वं के गच्छन्ति ?*

*(६) मध्ये के तिष्ठन्ति ?*

*(७) ''शशाङ्क:'' इत्यस्य व्युत्पत्तिजन्य: क: अर्थ: ?*

=o=